स्यादुदक्षैव पूजयेत् । आचरेत् प्रत्यहं स्नानं शुचिर्भूत्वा तथा बहिः । घृतेन होमं कुर्व्वीत सप्तम्याञ्च प्रदापयेत् हविष्याशी भवेन्नक्तं कुर्य्यात् संवत्सरं व्रतम् । संवत्सरान्ते दद्याच्च तथा धेनुं पयस्विनीम् । व्रतेनानेन चीर्णेन सप्तसागरमेखलाम् । भुनक्ति वसुधां राजा ! सप्तजन्मान्तराणि तु” ।

सम्पूर्णव्रतं भविष्योत्तरे “संपूर्णं नाम तच्चापि व्रतं सम्यक् फलप्रदम् । यच्चीर्णं नरनारीभिर्य्यावत् संपूर्णकालकम् । अवश्यन्तच्च कर्त्तव्यं संपूर्णफलकाङ्क्षिभिः । किञ्चिद्भग्नं प्रमादेन यद्व्रतं व्रतिनां भवेत् । तत् संपूर्णं भवेत् सर्व्वं व्रतेनानेन पाण्डव ! । उपद्रवैर्बहुविधैर्म्महामोहाच्च पार्थिव ! । यद्भग्नं किञ्चिदेव स्यात् व्रतं विघ्नविनायकैः । तत् संपूर्णं भवेत् सर्व्वं सत्यं सत्यं न संशयः । काञ्चनं रौप्यकं रूपं शिल्पिना तु घटापयेत् । भग्नव्रतस्य योदेवस्तत् स्वरूपं सुनिर्म्मितम् । रूपं स्त्रीपुंसयोर्व्वापि प्रारब्धं तद्व्रतं किल । न च निष्पादितं किञ्चिद्दैवात् सर्व्वं तथा स्थितम् । द्विभुजं पङ्कजारूढं सौम्यं प्रहसिताननम्” । द्विभुजादीनि स्त्रीपुंसयोरूपस्य विशेषणम् तच्च रूपमज्ञातेषु व्रतेषु, जन्मान्तरकृतानां विस्मृतानाञ्च ज्ञातत्वे तेष्वपीदं प्रायश्चित्तमिति । “निष्पादितं शिल्पिना च तस्मिन्नेव दिने पुनः । तस्मान्मासे पुनः प्राप्ते ब्राह्मणो विधिना गृहे । स्नापयेत् पयसा दध्ना घृतक्षीररसाम्बुभिः । गन्धचन्दनपुष्पैस्तु पूजयेत् कुसुमादिना । तोयपूर्णस्य कुम्भस्य मुखे विन्यस्य चन्दनैः । धूपदीपाक्षतैर्व्वस्त्रैर्नानाबल्युपहारकैः । अर्घ्यं दद्याच्च तन्नाम्ना मन्त्रेणानेन पाण्डव ! । उपवासेन हीनस्य प्रायश्चित्तं कृताञ्जलेः । शरणञ्च प्रपन्नस्य कुरुष्वाद्य दयां पुनः । परत्र भयभीतस्य भग्नवर्ज्यव्रतस्य च । कुरु प्रसादं संपूर्णमस्तु मे त्वत्प्रसादतः” ।

सम्भोगव्रतं भविष्यपु० “द्वे पञ्चम्यौ हि मासस्य द्वे च प्रतिपदौ नरः । सोपवासः सुगन्धाढ्यः शयीत प्रियया सह । खगनिश्चलचित्तस्तु रतिप्रीतिविवर्ज्जितः” । खगनिश्चलचित्तः सूर्य्यध्यानपरः “समस्य व्रतिशीलस्य तस्य पुण्यफलं शृणु । दिव्यं वर्षसहस्रन्तु दिव्यं वर्षशतं तथा । ततस्तु भावयत्येनं महादेवं न संशयः” ।

सर्पपञ्चमीव्रतं भविष्यपु० “पयोव्रतन्तु पञ्चम्यां दत्त्वा नागं द्विजातये । सौवर्णं सर्पजनितं भयं तस्य न जायते । एतत् सर्पव्रतं प्रोक्तं सर्पमैत्रीकरं परम्” ।

सर्पविषापहपञ्चमीव्रतं स्कन्द० प्रभासख० “श्रावणे मासि पञ्चम्यां शुक्लपक्षे वरानने ! । आरभ्योभयतो लेख्याः गोमयेन विषोल्वणाः । कृत्वा च कौसुमान्नागानिन्द्राणीं च प्रपूजयेत् । घृतोदकाभ्यां पयसा स्नापयित्वा वरानने ! । गोधूमैः पयसा पूज्य लाजाद्यैर्विविधैस्तथा । पूजयेत् विधिवद्देवि ! दधिदूर्व्वाङ्कुरैः क्रमात् । गन्धपुष्पोपहारैश्च ब्राह्मणानाञ्च तर्पणम् । अथ वा श्रावणे मासि पञ्चम्यां श्रद्धयान्वितः । यस्तालेख्य नरो नागान् कृष्णवर्णादिवर्णकैः । गुरुकल्पान् तथा वीथ्यां स्थगृहे विलिखेत् बुधः । पूजयेद्गन्धधूपैश्च पयसा पायसेन च । तस्य तुष्टिं समायान्ति पन्नगास्तक्षकादयः । आसप्तमात् कुलं तस्य न भयं नागतो भवेत् । प्रजप्यते तत्र मन्त्रो विषस्य प्रतिषेधकः । तस्य प्रजपमात्रे तु न विषं क्रमते सदा” ।

सर्व्वकामव्रतं विष्णुधर्म्मोत्तरोक्तम् “अङ्गारकं तथा सूर्य्यं निरृतिं वा खगेश्वरम् । हवनं वेश्वरं मृत्युं कपालकर्णकिङ्किणीम् । तत्र दैकादशान् यस्तु देवान् त्रिभुवनेश्वरान् । एकादश्यां सोपवासः सोमं सम्पूजयेत्तथा । गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा । मार्गशीर्षादथारभ्य यावत् संवत्सरं भवेत् । संवत्सरान्ते दद्याच्च ब्राह्मणाय पयस्विनीम् । कृत्वा व्रत वत्सरमेतदिष्टं रुद्रत्वमाप्नोति नरस्तु राजन् ! । रुद्रेण सार्द्धं सुचिरं वसित्वा कामानवाप्नोति मनोऽभिरामान् । तथा सर्व्वगतान् रुद्रान् सदा सर्व्वत्र पूजयेत् । सर्व्वकामानवाप्नोति सर्व्वानपराजितान्” । विष्णुधर्म्मोत्तरे “माघमासे चतुर्द्दश्यां कृष्णपक्षे विशेषतः । तथा पितृगणान् राजन् ! क्षीणचन्द्रे च पूजयेत् । सर्व्वकामसमृद्धस्य यज्ञस्य फलमश्नुते । श्राद्धं कृत्वा तथा राजन् ! सर्व्वकामानवाप्नुयात्” ।

सर्व्वकामाप्तिव्रतं विष्णुधर्म्मोत्तरे “कृत्तिकास्वर्च्चयेद्देवं कार्त्तिकीप्रभृतिक्रमात् । यावत् स्यात् कार्त्तिकी भूयो नरसिंहमुपोषितः । अनुलेपनपुष्पाद्यैः सर्व्वरत्नैः सदैव तु । व्रतावसाने दद्याद्गां तथा श्वेतां द्विजातये । श्वेतवस्त्रयुताञ्चैव रजतञ्च तथा नृप ! । उपोषितः सदा कुर्य्याद्व्रतं स्याच्छलवर्जितः” ।

सर्व्वव्रतं सौरपु० “मन्दवारयुता पुण्या शुक्लपक्षे त्रयोदशी । तस्यामुपोष्य विधिवत् सम्पूज्य गिरिजापतिम् । ब्रह्महत्यादिभिः पापैर्म्मुक्तो भवति मानवः” ।

सर्व्वाप्तिसप्तमीव्रतं भविष्यपु० “कृष्णपक्षे तु माघस्य सर्व्वाप्ति